# वेव्स-संस्थाद्वारा 'वैदिकज्ञानस्य वैज्ञानिकपक्षविषये ' चतुर्दिवसीयान्ताराष्ट्रियसम्मेलनायोजितम्

**डा. रणजित बेहेरा**
**संस्कृतविभागः, दिल्ली-विश्वविद्यालयः**

नवदेहली। नवदेहलीस्थ-भारतीयविद्याभवने समायोजिते चतुर्दिवसीयान्ताराष्ट्रियसम्मेलने विश्वस्य विभिन्नेभ्यः देशेभ्यः तथा भारतस्य प्रायः सर्वेभ्यः प्रदेशेभ्यः 150 विद्वांसः भागं गृहीतवन्तः। विद्वद्भिः वैदिकज्ञानस्य विविधाः पक्षाः सविस्तरं विचारिताः समुद्घाटिताश्च। विश्वस्य विविधानानां समस्यानां समाधानं भारतीयविद्यायाः वैदिकज्ञानस्य च सैद्धान्तिकदृष्ट्या कर्तुं शक्यते।









अमेरिका-कनाडा- यूके-फ्रान्स- इसराईल-नेपाल- भारतादीनां देशानां भारतविद्याविदां वैदिकविदुषां च सम्मेलनस्यास्यायोजनं वर्ल्ड एसोसिएशन फॉर्वैदिक स्टडीज तथा वाइडर एसोसिएशन फॉर वैदिक स्टडीज इत्याभ्यां संस्थाभ्यां भारतीयविद्याभवनस्य सौजन्येन



नवदेहलीस्थ-भारतीयविद्याभवनस्य मुंशी-मेमोरियल- सभागारे 15.12.2016 तः 18.12.2016 पर्यन्तं साफल्येन समायोजितम्। सम्मेलनस्यास्योद्घाटनसमारोहे भारतीय-विद्या- भवनस्य निदेशकः श्रीयुतः अशोकप्रधानः सर्वेषां विदुषां स्वागतं विधाय वैदिकज्ञानं सर्वेषां कृते आवश्यकमिति प्रत्यपादयत्। यदि मानवेषु विभेदस्य कारणं धर्म इति स्वीक्रियते चेदिदं स्मरणीयं यत् समेषां धर्माणामाविर्भावः वैदिकधर्मानन्तरं जात इति। पुनरपि तेन निगदितं यत् सर्वासां वैज्ञानिकधाराणां मूलस्रोतांसि वैदिकसंहितासु एव विद्यन्ते। वेव्स- अन्ताराष्ट्रियस्य निदेशकः श्रीयुतः धीरेन्द्रशाहः वैदिज्ञानस्य व्यावहारिकोपयोगितां प्रतिपाद्य वेव्स-संस्थायाः उद्देश्यानाम् तथा विविधकार्यक्रमाणां विषये प्रावोचत। वेव्स-भारतस्य उपाध्यक्षः प्रो. ललनप्रसादः उक्तवान् यत् वैदिकऋषिप्रज्ञायाः सुक्ष्मान्वेषणमस्माभः विधातव्यमिति। मुख्यातिथिपदमलंकुर्वता उत्तराखण्ड-संस्कृत- विश्वविद्यालयस्य भूतपूर्व-कुलपतिना प्रो. महावीरअग्रवालेन भणितं यत् वैदिकदेवतायां वैदिकोपासनायां च निहितानि वैज्ञानिकतथ्यान्यवलोकनीयानीति। वैदिकऋषिभिः सर्वमिदं विज्ञाय प्राकृतिकशक्तयः स्तुताः। अवसरेऽस्मिन् ट्रिनीडाडतः समुपागता डा. इन्द्राणी रामप्रसादः, कनाडातः श्रीयुतः जफरी आर्मस्ट्रंगः, अमेरिकायाः महर्षि युनिवर्सिटी आफ मैन्जमेन्ट इत्यस्य संकायाध्यक्षः प्रो. रोवर्ट एच्. श्रीन्डरः च विशिष्टातिथिरूपेण समुपस्थिताः आसन्। उद्घाटनसत्रे वेव्स इत्यस्याः संस्थायाः पंचमप्रकाशनस्य 'भारतीय परम्परा में स्वास्थ्य एवं सुख' इत्याख्यस्य पुस्तकस्य लोकार्पणं विहितम्। प्रो. शशितिवारीद्वारा सम्पादितमेनत्पुस्तकं प्रतिभाप्रकाशनेन प्रकाशितम्। वेव्स इत्यस्य अन्ताराष्ट्रियाध्यक्षः श्रीयुतः शशिकेजरीवालः स्वकीयाध्यक्षीयभाषणे प्रावोचत यदिदानीं भारते विद्वांसः शोधार्थिनश्च वैदिकविद्यायाः अध्ययनाध्यापने प्रयत्नशीला एव। सम्मेलनेऽस्मिन् 130 शोधपत्राणां वाचनं भविष्यति येषु प्रायः 20 वैदेशिक-विद्वांसः वर्तन्ते। वैदेशिकविद्वत्सु श्रीयुतः कोर्नाड इस्ट, श्रीयुतः जफरी अर्मस्ट्रांगः, डा. नरहरिआचारः, डा. कोमा कर्पेन्टर, डा. कुमारनोचरः, श्रीमती मधुशर्मा, डा. मिकल स्टर्नफील्ड, डा. रेनी रवेहः, डा. जोन जे क्लिमेन् प्रभृतयः प्रमुखा एव। हैदरवदतः वैज्ञानिकः वेदविद् च डा. भक्तिनिष्कामशान्ता, डा. भाक्तिविज्ञानमुनिः डा. जगन्नाथः च; इन्दोरतः डा. चन्द पी. त्रिवेदी; देहलीतः प्रो. एम. एम. बजाजः, प्रो. आर एस कौशलः, प्रो. रमेशभारद्वजः, प्रो. शारदाशर्मा, डा. उर्मिलरुस्तगी, डा. प्रवेशसक्सेना, डा. प्रतापानन्दझा; जोधपुरतः प्रो. रामगोपालः, बेंगलोरतः डा. सी एल प्रभाकरः, कोलकातातः डा. सोमाबासुः, असमतः डा. शकुन्तला, अजमेरतः डा. सुनीताखुराना, बरेलीतः डा. श्वेतकेतुशर्मा प्रभृतयः विद्वांसः उपस्थिताः आसन्। दिल्ली-विश्वविद्याअलयस्य लेडी श्रीराम महाविद्यालयस्य छात्राः सम्मेलनस्यास्य द्वितीयदिवसस्य सांस्कृतिकसन्ध्यायां 'भगवदज्जुकीयम्' प्रहसनम् अभिनीतवत्यः। अस्य कार्यक्रमस्य तृतीयदिवसस्य सांस्कृतिकसन्ध्यायां डा. दीपाकुमारीद्वारा निर्मितं डाक्यूमेन्टरी फिल्म 'हिस्ट्री आफ योग' इत्यस्य प्रदर्शनं कारितम्। सम्मेलनस्यास्य समापनसत्रे विशिष्टातिथिः आसीत् लन्दनस्थ-सेण्ट-जेम्स- विद्यालयस्य निदेशकः तथा 'इफ आई केन' इत्यस्याः संस्थायाः च निदेशकः श्रीयुतः पाल पालमारोजा। तेन उक्तं यत् लन्दनस्य विद्यालयेषु संस्कृतशिक्षणे रुचिः दिनानुदिनं वर्धते। अन्ताराष्ट्रिय-सम्मेलनमिदं वेव्स-अन्ताराष्ट्रियाध्यक्षस्य प्रो. बलरामसिंहस्य प्रेरणया निदेशनेन च तथा वेव्स-भारतस्य महासचिवमहोदयया प्रो. शशितिवारीद्वारा कार्यान्वितं कृतम्। सम्मेलनस्यास्य अध्यक्षा प्रो. शशितिवारी, जवाहरलालनेहरुविशिविद्यालयस्य दर्शनविभागस्य प्रो. आर पी सिंहः उपाध्यक्षः च आस्ताम्। तिसर्णां संस्थानां संयुक्तसहयोगेन सम्मेलनमिमं साफल्येनायोजितम्।




हरियाणास्कृताकादमी अपि च भारतविकासपरिषद्शाखासिरसा संयुक्ततत्वाधाने पं. जगदीशचन्द्रशास्त्रिः ( महर्षि वेदव्यास सम्मानेनालंकृतः ) षष्ठपुण्यतिथ्यवसरे संस्कृतसम्मानसमारोहस्यायोजनम् अभूत्।

खादी वस्त्र ही नहीं, विचार है !
आदर्श ग्रामोद्योग समिति, दिल्ली
खादी वस्त्रों का विशाल भण्डार
✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल ( रेडीमेड ) ✪ रेशम साड़ी ( रिल्ड )
✪ रेशम स्पन व रेडीमेड ✪ पोली खादी
सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद, अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।
खादी ग्रामोद्योग भवन
✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, ( उ० प्र० )
✪ शेरपुर चौक, करावल नगर, दिल्ली-110094
फोन:-0120-2631855, 9899334204

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः,
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, शुभम् आर्य, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।